# Brahmakrita Devi Prarthana

# ब्रह्मकृता देवीप्रार्थना

## Document Information

Text title : Brahmakrita Devi Prarthana

File name : devIprArthanAbrahmakRRitA.itx

Category : devii, gaNeshapurANa

Location : doc_devii

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 16 | 1.16 20-28||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ब्रह्मकृता देवीप्रार्थना

ब्रह्मोवाच ।
स्वाहास्वधारूपधरा सुधा त्वं मात्रार्धमात्रास्वरूपिणी च ।
कर्त्री च हर्त्री जननी जनस्य सतोऽसतः शक्तिरसि त्वमेव ॥ २०॥

श्रुतिःस्वरा कालरात्रिरनादिनिधनाऽक्षया ।
जगन्माता जगद्धात्री सृष्टिस्थित्यन्तकारिणी ॥ २१॥

सावित्री च तथा सन्ध्या महामाया तृषा क्षुधा ।
सर्वेषां वस्तुजातानां शक्तिस्त्वमसि पार्वति ॥ २२॥

त्रैलोक्यकर्त्ता त्वन्नाथो दैत्यदानवसूदनः ।
निद्रया व्याप्तचित्तोऽसौ ज्ञानविज्ञानवान् हरिः ॥ २३॥

जगदुत्पाद्यते येन पाल्यते ह्रियतेऽपि च ।
सोऽपि त्वयावताराणां सङ्कटे विनियोज्यते ॥ २४॥

दुष्टात्मानौ मोहयैतौ त्वं दैत्यौ मधुकैटभौ ।
हन्तुमेतौ दुराधर्षौ ज्ञानमस्य प्रदीयताम् ॥ २५॥

अहमाराधितश्चाभ्यां पूर्वजन्मन्यतन्द्रितम् ।
वरान् बहुविधान् प्रादामवध्यौ मम तावुभौ ॥ २६॥

तयोरूच्चावचान् शब्दानतोऽहमसहं बहु ।
मामेव हन्तुकामौ तौ स्तुतौ नानाविधैः स्तवैः ॥ २७॥

तथापि मद्वधात्तौ न निवृत्तौ दुष्टभावतः ।
अतस्त्वां प्रार्थये देवि ! विष्णुबोधनहेतवे ॥ २८॥

इति ब्रह्मकृता देवीप्रार्थना सम्पूर्णा ॥

- ॥ श्रीगणेशपुराणं उपासना (पूर्व)खण्ड । अध्याय १६ । १.१६ २०-२८॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 16 . 1.16 20-28..

Proofread by Preeti Bhandare

*Brahmakrita Devi Prarthana*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*